Visit Dwarkadheeshvastu.com For
FREE Vastu Consultancy, Music, Epics, Devotional Videos
Educational Books, Educational Videos, Wallpapers
****
All Music is also available in CD format. CD Cover can also be print with your Firm Name
****
We also provide this whole Music and Data in PENDRIVE and EXTERNAL HARD DISK.
Contact : Ankit Mishra (+91-8010381364, dwarkadheeshvastu@gmail.com)

॥ श्रीहरिः ॥

वाल्मीकीयरामायणान्तर्गत

मूलरामायणम्

(मराठी)

VISIT…

या सर्गात ९० ते ९७ श्लोकांत रामराज्यात पुढे काय होईल, याविषयीचे वर्णन आले आहे. तसेच लवकुश श्रीरामांना रामकथा सांगतात, असेही आले आहे. यावरून वाल्मीकी ऋषी श्रीरामांच्या समकालीन होते व श्रीराम राज्यावर बसले, त्यावेळी वाल्मीकींनी नारदांना प्रश्न विचारला असावा व त्यांनी थोडक्यात रामचरित्र सांगितले असावे, असे दिसते. कसेही असले, तरी वाल्मीकिरामायण हेच उत्तरकालीन सर्व रामचरित्रांचा आधार आहे, हे निःसंशय.

श्रीरामांशी संबधित श्रीरामरक्षा व आदित्यहृदय अशी दोन स्तोत्रे दिली आहेत. शिवाय परंपरेनुसार मूलरामायणाआधी 'मंगलाचरण' व शेवटी 'प्रार्थना' म्हणण्यासाठी दिली आहे. शिवाय श्रीसमर्थ रामदासस्वामिविरचित भावपूर्ण करुणाष्टकें, श्रीमारुतिस्तोत्र व श्रीगुरूपदेश यांचाही या पुस्तिकेत समावेश केला आहे.

या पुस्तिकेचा अधिकाधिक श्रीरामभक्तांना उपयोग होईल, अशी आशा आहे.

॥ श्रीगणेशायनमः ॥ iii

मंगलाचरणम्

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम्।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥१॥

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥२॥

जयति रघुवंशतिलकः कौसल्याहृदयनन्दनो रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥३॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥४॥

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥५॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षात् रामायणात्मना ॥६॥

गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥७॥

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥८॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥९॥

यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम् ॥१०॥

॥ श्रीगणेशाय नमः ॥

मूलरामायणम्

ॐतपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥१॥

तपस्वी वाल्मीकी मुनींनी विद्वच्छ्रेष्ठ, तप आणि स्वाध्यायात सतत रमलेल्या मुनिश्रेष्ठ नारदांना विचारले. (१)

को न्वस्मिन्साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥२॥
चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥३॥
आत्मवान्को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ॥४॥
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥५॥

सध्या या विश्वात गुणी, पराक्रमी, धर्म जाणणारा, कृतज्ञ, सत्यवचनी, घेतलेले व्रत निष्ठेने पाळणारा,

चारित्र्यसंपन्न, सर्व प्राण्यांच्या हितात तत्पर, विद्वान, सामर्थ्यसंपन्न, सर्वांत अत्यंत सुंदर, जितेन्द्रिय, क्रोध जिंकलेला, तेजस्वी, कोणाचा मत्सर न करणारा, युद्धाच्या वेळी रागावला असता ज्याला देवही भितात, असा पुरुषोत्तम कोण आहे बरे ? हे जाणण्याची मला इच्छा आहे. नव्हे तर, फारच उत्सुकता आहे. हे महर्षे, असा पुरुष केवळ आपल्यालाच माहीत असणेशक्य आहे. (कारण आपण सर्वत्र संचार करणारे असून आपल्याला दिव्य दृष्टी आहे.) (२-५)

श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः।
श्रूयतामिति चामन्त्य प्रहृष्टो वाक्यमब्रवीत् ॥६॥

वाल्मीकींचे हे बोलणे ऐकून 'ऐका' असे म्हणून त्रिलोकज्ञानी नारदऋषी मोठ्या आनंदाने सांगू लागले. (६)

बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥७॥

हे मुने, आपण जे गुण सांगितले, ते पुष्कळ असून (एका ठिकाणी) आढळणे कठीण आहे. (तरीही) या गुणांनी संपन्न पुरुषोत्तम मला माहीत आहे. त्याच्याविषयी मी सांगतो, ऐका.(७)

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान्वशी ॥८॥
बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिबर्हणः।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥९॥
महोरस्को महेष्वासो गूढजत्रुररिन्दमः।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥१०॥
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान्।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥११॥
धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥१२॥
प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥१३॥
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥१४॥
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान्प्रतिभानवान्।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥१५॥

इक्ष्वाकुवंशांत जन्मलेले असे एक पुरुष आहेत, ते लोकांत 'राम' या नावाने प्रसिद्ध आहेत. ते जितेन्द्रिय, महापराक्रमी, कान्तिमान, धैर्यवान, मनावर ताबा असणारे, बुद्धिमान, नीतिमान, वक्ते, सुंदर, शत्रूंवर जय मिळवणारे आहेत. त्यांचे खांदे रुंद असून बाहू लांब आहेत. मान शंखासारखी असून हनुवटी पुष्ट आहे. छाती रुंद असून त्यांचे धनुष्य मोठे आहे. गळ्याखालच्या फासळ्या मांसल असल्याने दिसत नाहीत. शत्रूंवर त्यांचा ताबा आहे. त्यांचे हात गुडघ्यापर्यंत पोचतात. मस्तक आणि कपाळ फार सुंदर आहेत. चालणे रुबाबदार आहे. त्यांची उंची यथायोग्य असून सर्व अवयव प्रमाणशीर आहेत. कांती तुकतुकीत असून वक्षःस्थल भरदार आहे. नेत्र विशाल आहेत. ते पराक्रमी असून सौंदर्यसंपन्न आहेत. त्यांच्या शरीरावर सर्व शुभ लक्षणे दिसत आहेत. ते धर्मज्ञ, सत्यप्रतिज्ञ, प्रजाहितदक्ष, कीर्तिमान, ज्ञानी, पवित्र जितेंद्रिय आणि मन एकाग्र असणारे आहेत. प्रजापतीप्रमाणे प्रजापालक, लक्ष्मीसंपन्न, शत्रु विनाशक, प्राण्यांचे व धर्माचे रक्षण करणारे आहेत. स्वधर्म पालन करणारे, स्वजनांचे रक्षण

करणारे, वेद व वेदांगे यांचे रहस्य जाणणारे, धनुर्विद्येत पारंगत, सर्व शास्त्रांचा अर्थ व त्यांचे रहस्य जाणणारे, स्मरणशक्ती व प्रतिभा यांनी संपन्न, सर्व लोकांना प्रिय, सज्जन, उदार हृदय असणारे व चतुर आहेत. (८-१५)

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥१६॥

नद्या जशा सागराला मिळतात, तसे सज्जन नेहमी त्यांच्याकडेच येतात. ते सद्वर्तनी, सर्वत्र समभाव बाळगणारे असून त्यांचे दर्शन सर्वांना नेहमीच प्रिय वाटते. (१६)

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ॥१७॥
विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥१८॥
धनदेन समस्त्यागे सत्ये धर्म इवापरः ।

कौसल्येचा आनंद वाढविणारे ते सर्वगुणसंपन्न आहेत. समुद्रासारखे गंभीर, हिमालयासारखे धीर, विष्णूंसारखे पराक्रमी, चंद्रासारखे आह्लाददायक, क्रोध आला असता प्रलयकाळच्या अग्नीसारखे, क्षमा करण्याच्या बाबतीत पृथ्वीसारखे, त्याग करण्याच्या बाबतीत कुबेरासारखे आणि सत्यपालनात जणू दुसरे धर्मच असे ते आहेत. (१७-१९ पू.)

तमेवंगुणसम्पन्नं रामं सत्यपराक्रमम् ॥१९॥
ज्येष्ठं ज्येष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥२०॥
यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः ।
तस्याभिषेकसम्भारान्दृष्ट्वा भार्याथ कैकयी ॥२१॥
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ॥२२॥

अशा रीतीने सर्वगुणसंपन्न, सत्यपराक्रमी, उत्तमोत्तम गुणांनी युक्त असा आपला प्रिय जेष्ठ पुत्र प्रजेच्या कल्याणात तत्पर आहे, असे पाहून दशरथ राजाने प्रेमाने त्याला

यौवराज्याभिषेक करावयाचे ठरविले. त्याच्या अभिषेकाची तयारी चाललेली पाहून, जिला राजाने पूर्वी वर मागावयास सांगितले होते, त्या राणी कैक्येयीने राजाकडे दोन वर मागितले. एका वराने रामाला वनवास आणि दुसऱ्याने भरताला राज्याभिषेक. (१९ उ.-२२)

स सत्यवचनाद्राजा धर्मपाशेन संयत: ।
विवासयामास सुतं रामं दशरथ: प्रियम् ॥२३॥

तो राजा सत्यवचनी असल्यामुळे धर्मबंधनात अडकला आणि त्याने आपल्या प्रिय पुत्र रामाला वनवासाला पाठविले. (२३)

स जगाम वनं वीर: प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात्कैकेय्या: प्रियकारणात् ॥२४॥

ते वीर राम पित्याच्या सांगण्यावरून त्यांची प्रतिज्ञा पूर्ण करण्यासाठी आणि कैक्येयीच्या मनासारखे करण्यासाठी वनात गेले. (२४)

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः ॥२५॥
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

ते निघाल्याबरोबर सुमित्रेचा आनंद वाढविणारा, विनयशील, रामाचा लाडका भाऊ लक्ष्मण प्रेमामुळे आपल्या श्रेष्ठ बंधुत्वाचा परिचय देत त्यांचा मागोमाग निघाला.

(२५-२६ पू.)

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ॥२६॥
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ॥२७॥
सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ॥२८॥

श्रीरामांची प्राणाहून प्रिय पत्नी सीता नेहमी त्यांचे हित करण्यात तत्पर असे. देवमायेनेच अवतार घेतला असे वाटणारी ती जनककुळातील होती. ती सर्व स्त्रीलक्षणांनी संपन्न असून स्त्रियांतील सर्वोत्तम स्त्री होती. चंद्रामागोमाग रोहिणी जावी,

तशी तीही श्रीरामांच्या मागोमाग गेली. त्यावेळी सर्व नागरिकांनी दूरवर जाऊन त्यांना निरोप दिला, तर वडील दशरथ यांनी आपला सारथी सुमंत्र याला रथ देऊन पाठविले. (२६ उ.-२८)

शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥२९॥

नंतर शृंगवेरपुरात गंगेच्या काठी राहणाऱ्या प्रिय निषादराज गुहाकडे पोचल्यावर धर्मशील रामांनी सारथ्याला परत पाठविले. (२९)

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥३०॥
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥३१॥
देवगन्धर्वसंकाशास्तत्र ते न्यवसन्सुखम् ।

गुह, लक्ष्मण व सीता यांच्यासह श्रीराम एका वनातून दुसऱ्या वनात याप्रमाणे निघाले. वाटेत पाण्यांनी तुडुंब

भरलेल्या नद्या त्यांनी पार केल्या. जाता जाता ते भरद्वाजांच्या आश्रमात पोचले. भरद्वाजांच्या सांगण्यावरून ती चित्रकूट पर्वतावर गेली. (गुहाला परत पाठवून) देवगंधर्वांप्रमाणे असणारी ती तिघे तेथे सुंदर पर्णकुटी बांधून वनात रममाण होत आनंदाने राहू लागली. (३०-३२ पू.)

चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ॥३२॥
राजा दशरथः स्वर्गं जगाम विलपन्सुतम् ।
गते तु तस्मिन्भरतो वसिष्ठप्रमुखैर्द्विजैः ॥३३॥
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ॥३४॥

राम चित्रकूटावर गेल्यावर पुत्रशोकाने व्याकूळ झालेला दशरथराजा मुलाची आठवण काढीत स्वर्गाला गेला. राजा गेल्यावर वसिष्ठादी ऋषींनी महाबली भरताला राज्यावर बसवायचे ठरविले. पण त्याला राज्यावर बसण्याची इच्छा नव्हती. म्हणून तो वीर रामांना प्रसन्न करण्यासाठी वनात गेला. (३२उ.-३४)

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।
अयाचद् भ्रातरं राममार्यभावपुरस्कृतः ॥३५॥
त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।
रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥३६॥
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः ।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ॥३७॥
निवर्तयामास ततो भरतं भरताग्रजः ।
स काममनवाप्यैव रामपादावुपस्पृशन् ॥३८॥
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षया ।
गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ॥३९॥
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तत्रागमनमेकाग्रो दण्डकान्प्रविवेश ह ॥४०॥

तेथे गेल्यावर त्याने सत्यपराक्रमी महात्मा बंधू रामांना प्रार्थना केली की, "दादा, धर्म जाणणारे आपण आहात. आपणच राजा व्हा." उदार अंत:करण असणाऱ्या, अत्यंत कीर्तिमान, महाबली रामांनीही वडिलांच्या आज्ञेनुसार प्रसन्न मुखानेच राज्य नाकारून आपल्या पादुका राजसिंहासनावर

स्थापन करण्यासाठी ठेव म्हणून भरताच्या स्वाधीन करून पुन्हा पुन्हा त्याची समजूत घालून त्याला परत पाठवले. त्यामुळे त्याची इच्छा पूर्ण झाली नाही. अखेर रामचरणांना स्पर्श करून तो परतला आणि त्यांच्या येण्याची प्रतीक्षा करीत नन्दिग्रामांत राज्य करू लागला. भरत परत गेल्यावर इन्द्रियनिग्रही, सत्यप्रतिज्ञ श्रीरामांनी, तेथे वारंवार आपल्याला भेटण्यासाठी लोक येत-जात राहाणार, हे लक्षात येऊन निश्चयपूर्वक दण्डकारण्यात प्रवेश केला. (३५-४०)

प्रविश्य तु महारण्यं रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥४१॥
सुतीक्ष्णं चाप्यगस्त्यं च अगस्त्यभ्रातरं तथा ।
अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥४२॥
खड्गं च परमप्रीतस्तूणी चाक्षयसायकौ ।
वसतस्तस्य रामस्य वने वनचरैः सह ॥४३॥
ऋषयोऽभ्यागमन्सर्वे वधायासुररक्षसाम् ।
स तेषां प्रतिशुश्राव राक्षसानां तदा वने ॥४४॥

प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ।
ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥४५॥

कमलनयन रामांनी त्या घनदाट अरण्यात गेल्यावर प्रथम विराध राक्षसाला मारले. नंतर शरभङ्ग, सुतीक्ष्ण, अगस्त्य आणि अगस्त्यबंधू यांच्या आश्रमात जाऊन त्यांच्या आतिथ्याचा स्वीकार केला. तसेच अगस्त्य मुनींच्या सांगण्यावरून त्यांच्याकडून इंद्र-धनुष्य, तलवार आणि ज्यातील बाण कधीच कमी होत नाहीत, असे दोन भाते मोठ्याआनंदाने घेतले. त्या वनात ऋषी व लोक यांच्यासह राम राहातअसताना तेथील सर्व अग्नीसारखे तेजस्वी ऋषी वनात राहाणाऱ्या असुरांचा व राक्षसांचा वध करण्याची त्यांना विनंती करण्यासाठी आले. तेव्हा श्रीरामांनी युद्धात राक्षसांना मारण्याचे त्यांना वचन दिले. (४१-४५)

तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥४६॥

तेथेच राहात असताना त्यांनी जनस्थानात राहाणाऱ्या शूर्पणखा नावाच्या इच्छेनुसार रूपे घेणाऱ्या राक्षसीला

(लक्ष्मणाकडून नाक-कान कापवून) कुरूप केले. (४६)

ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान् ।
खरं त्रिशिरसं चैव दूषणं चैव राक्षसम् ॥४७॥
निजघान रणे रामस्तेषां चैव पदानुगान् ।
वने तस्मिन्निवसता जनस्थाननिवासिनाम् ॥४८॥
रक्षसां निहतान्यासन्सहस्राणि चतुर्दश ।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः ॥४९॥

नंतर शूर्पणखेच्या सांगण्यावरून खर, त्रिशिरस आणि दूषण असे तीन राक्षस चौदा हजार राक्षसांचे सैन्य घेऊन श्रीरामांवर चालून आले. त्या वनात राहाणाऱ्या श्रीरामांनी त्या सर्व राक्षसांचा वध केला. आपले बांधव मारले गेले हे (शूर्पणखेकडून) ऐकताच रागाने रावणाच्या अंगाचा तिळपापड झाला. (४७-४९)

सहायं वरयामास मारीचं नाम राक्षसम् ।
वार्यमाणः सुबहुशो मारीचेन स रावणः ॥५०॥

त्यावेळी मारीच नावाच्या राक्षसाकडे त्याने मदत मागितली. तेव्हा मारीचाने रावणाला अनेक प्रकारे समजावून परावृत्त करण्याचा प्रयत्न केला. (५०)

न विरोधो बलवता क्षमो रावण तेन ते ।
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥५१॥
जगाम सहमारीचस्तस्याश्रपदं तदा ।
तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥५२॥

"हे रावणा, आपल्याहून सामर्थ्यवान असणाऱ्याशी विरोध करणे, तुझ्या हिताचे नाही," हे मारीचाचे सांगणे अव्हेरून काळाच्या प्रेरणेने रावण रामांच्या आश्रमाजवळ आला. मायावी (मृगरूप) मारीचाकरवी त्याने रामलक्ष्मणांना आश्रमापासून दूर नेले. (५१-५२)

जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम् ।
गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥५३॥
राघवः शोकसन्तप्तो विललापाकुलेन्द्रियः ।
ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ॥५४॥
मार्गमाणो वने सीतां राक्षसं संददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥५५॥
तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ।
स चास्य कथयामास शबरीं धर्मचारिणीम् ॥५६॥

श्रमणां धर्मनिपुणामभिगच्छेति राघव ।
सोऽभ्यगच्छन्महातेजाः शबरीं शत्रुसूदनः ॥५७॥

नंतर सीतेला पळवून नेत असता (विरोध करणाऱ्या) जटायूला त्याने घायाळ केले. सीतेला रावणाने पळविले हे ऐकून व (त्यामुळेच) जटायू मरण पावला हे पाहून श्रीराम शोकाकूळ होऊन विलाप करू लागले. त्याच स्थितीत त्यांनी जटायूवर अग्निसंस्कार केले आणि ते सीतेच्या शोधासाठी निघाले. तेथे त्यांना डोके नसलेला भयंकर कबंध नावाचा राक्षस दिसला. पराक्रमी रामांनी त्याला मारून अग्नी दिला, तेव्हा दिव्यरूप गंधर्व होऊन तो स्वर्गाला गेला. त्यानेच श्रीरामांना सांगितले की, "हे राघवा, तुम्ही धर्माप्रमाणे वागणाऱ्या संन्यासिनी शबरीकडे जा." त्याप्रमाणे शत्रुसंहारक महातेजस्वी राम शबरीकडे गेले. (५३-५७)

शबर्या पूजितः सम्यग्रामो दशरथात्मजः ।
पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥५८॥

शबरीकडून पूजा घेऊन दाशरथी राम पम्पासरोवरावर गेले. तेथे हनुमान नावाच्या वानरश्रेष्ठाशी त्यांची भेट झाली.

(५८)

हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।
सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ॥५९॥
आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः ।
सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ॥६०॥
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।
ततो वानरराजेन वैरानुकथनं प्रति ॥६१॥
रामायावेदितं सर्वं प्रणयाद् दुःखितेन च ।
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ॥६२॥

हनुमंताच्या सांगण्यावरून महाबलवान रामांनी सुग्रीवाशी मैत्री करून त्याला पहिल्यापासून आपली सर्व हकीकत, विशेषतः सीतेसंबंधीची वार्ता सांगितली. सुग्रीव वानरानेही ते सर्व ऐकून प्रेमपूर्वक श्रीरामांशी अग्नीच्या साक्षीने मैत्री केली.

नंतर दु:खी वानरराजाने मित्रप्रेमामुळे श्रीरामांना वालीशी वैर उत्पन्न होण्याची सर्व हकीकत सांगितली. तेव्हा श्रीरामांनीही वालिवधाची प्रतिज्ञा केली. (५९-६२)

वालिनश्च बलं तत्र कथयामास वानरः ।
सुग्रीवः शङ्कितश्चासीन्नित्यं वीर्येण राघवे ॥६३॥
राघवप्रत्ययार्थं तु दुन्दुभेः कायमुत्तमम् ।
दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥६४॥

सुग्रीवाने श्रीरामांच्या सामर्थ्याबद्दल शंका वाटून त्यांना वालीचे प्रचंड सामर्थ्य सांगितले आणि श्रीरामांना त्याची खात्री पटावी म्हणून वालीने मारलेल्या दुंदुभी राक्षसाचे मोठ्या पर्वताएवढे प्रचंड शरीर दाखवले. (६३-६४)

उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।
पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ॥६५॥

महापराक्रमी रामांनी तुच्छतेने किंचित हसून त्याच्या हाडांचा पूर्ण सांगाडा आपल्या पायाच्या केवळ आंगठ्याने दहा योजने दूर फेकला. (६५)

बिभेद च पुनस्तालान्सप्तैकेन महेषुणा ।
गिरिं रसातलं चैव जनयन्प्रत्ययं तदा ॥६६॥

त्यानंतर आपल्या पराक्रमाची सुग्रीवाला खात्री पटवण्यासाठी श्रीरामांनी एका मोठ्या बाणाने सात तालवृक्ष छेदून टाकले. इतकेच नव्हे तर तोच बाण पर्वताला छिद्र पाडून रसातळांत घुसला. (६६)

ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम च गुहां तदा ॥६७॥

तेव्हा त्या महावानराला विश्वास उत्पन्न होऊन आनंद झाला. नंतर तो श्रीरामांसह किष्किंधेच्या गुहेत गेला. (६७)

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।
तेन नादेन महता निर्जगाम हरीश्वरः ॥६८॥
अनुमान्य तदा तारां सुग्रीवेण समागतः ।
निजघान च तत्रैनं शरेणैकेन राघवः ॥६९॥

तेथे जाऊन सोनेरी रंगाच्या वानरश्रेष्ठ सुग्रीवाने मोठी गर्जना केली. ती ऐकून वानरश्रेष्ठ वाली गुहेतून बाहेर आला.

तेव्हा तारेला पटवून तिची अनुमती घेऊन तो सुग्रीवाशी भिडला. तेथे रामांनी एका बाणाने त्याला ठार केले. (६८-६९)

ततः सुग्रीववचनाद्धत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ॥७०॥

नंतर सुग्रीवाच्या सांगण्याप्रमाणे युद्धात वालीला मारून श्रीरामांनी त्याच्या राज्यावर सुग्रीवाला बसविले. (७०)

स च सर्वान्समानीय वानरान्वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ॥७१॥

वानरराज सुग्रीवाने सर्व वानरांना एकत्र बोलावून सीतेच्या शोधासाठी त्यांना दशदिशांना पाठविले. (७१)

ततो गृध्रस्य वचनात्सम्पातेर्हनुमान्बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥७२॥
तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीमशोकवनिकां गताम् ॥७३॥

नंतर संपातीच्या सांगण्यावरून बलवान हनुमानाने शंभर योजने रुंद समुद्र ओलांडून रावणाची राजधानी असणाऱ्या लंकानगरीत प्रवेश केला. तेथे त्याला अशोकवनात चिंताग्रस्त असलेली सीता दिसली. (७२-७३)

निवेदयित्वाभिज्ञानं प्रवृत्तिं विनिवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥७४॥

त्याने सीतेला आपली ओळख सांगितली. श्रीरामांची मुद्रिका देऊन त्यांचे कुशल सांगितले. नंतर तिला धीर देऊन अशोकवाटिकेचे दार मोडून टाकले. (७४)

पञ्च सेनाग्रगान्हत्वा सप्त मन्त्रिसुतानपि ।
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ॥७५॥

नंतर पाच सेनापती व सात मंत्रिपुत्रांना मारले. शूर अक्षाचाही वध केला आणि स्वत: बंधन स्वीकारले. (७५)

अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन्राक्षसान् वीरो यन्त्रिणस्तान्यदृच्छया ॥७६॥

ब्रह्मदेवांच्या वराने आपण ब्रह्मपाशातून मुक्त झालो आहोत, हे जाणूनही आपल्याला बांधणाऱ्या राक्षसांचा अपराध हनुमानाने स्वेच्छेने सहन केला. (७६)

ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ॥७७॥

नंतर सीतेचे स्थान सोडून इतर लंका नगरी त्याने जाळून टाकली आणि रामाला सीतेचे कुशल सांगण्यासाठी तो पुन्हा श्रीरामांकडे आला. (७७)

सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥७८॥

अमर्याद बुद्धी व शक्तीने युक्त हनुमानाने महात्म्या रामांजवळ जाऊन त्यांना प्रदक्षिणा घालून नमस्कार केला व सीतेचे दर्शन झाल्याचे सांगून सर्व वृत्त निवेदन केले. (७८)

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥७९॥

नंतर श्रीरामांनी सुग्रीवासह महासागराच्या किनाऱ्यावर जाऊन सूर्यासारख्या प्रखर बाणांनी समुद्राला तप्त केले. (७९)

दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥८०॥

तेव्हा नदीपती समुद्र मनुष्यरूपात प्रगट झाला. त्याच्या सांगण्यावरून श्रीरामांनी नलाकडून सेतू बांधून घेतला. (८०)

तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥८१॥

त्यावरून लंकेला जाऊन रावणाला युद्धात ठार केले आणि सीतेला परत आणले. परंतु रामांना तिचा स्वीकार करणे योग्य वाटले नाही. (८१)

तामुवाच ततो रामः परुषं जनसंसदि ।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥८२॥

(परगृही राहिल्यामुळे) लोकांच्या देखत राम तिला फार कठोर बोलले. त्या पतिव्रता सीतेला ते सहन न होऊन (स्वतःचे पावित्र्य सिद्ध करण्यासाठी) तिने अग्निप्रवेश केला. (८२)

ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् ।
कर्मणा तेन महता त्रैलोक्यं सचराचरम् ॥८३॥
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ।
बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः ॥८४॥

नंतर अग्निदेवांच्या सांगण्यावरून सीता निष्कलंक आहे, हे श्रीरामांना (मुख्यत: सर्व लोकांना) कळले. महात्म्या श्रीरामचंद्राच्या राक्षसवधाच्या त्या महान कृत्यामुळे देव, ऋषी यांच्यासह चराचरात्मक सारे त्रैलोक्य संतुष्ट झाले. त्यावेळी साऱ्या देवगणांनी श्रीरामांची स्तुती केली. तेव्हा श्रीराम प्रसन्नतेने शोभू लागले. (८३-८४)

अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥८५॥

त्यांन राक्षसराज बिभीषणाचा लंकेच्या राज्यावर अभिषेक केला. अशा रीतीने अवतारकार्याचा (मुख्य भाग) पूर्ण झाल्यामुळे चिन्तामुक्त झालेले राम अतिशय आनंदित झाले. (८५)

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥८६॥

नंतर देवांना प्रार्थना करून त्यांच्याकरवी मृत वानरांना उठवून सर्व राक्षस-वानर-मित्रांसह श्रीराम पुष्पक विमानाने अयोध्येला निघाले. (८६)

भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।
भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ॥८७॥
पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा ।
पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ॥८८॥

भरद्वाज मुनींच्या आश्रमात गेल्यानंतर सत्यपराक्रमी रामांनी हनुमंताला भरताकडे पाठविले. आणि नंतर सुग्रीवाबरोबर वार्तालाप करीत त्याच पुष्पक विमानात बसून नन्दिग्रामात गेले. (८७-८८)

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥८९॥

नन्दिग्रामांत गेल्यावर जटा काढून टाकून पुण्यशील राम सीता व आपले बंधू यांच्यासह पुन्हा आपल्या राज्यात आले. (८९)

प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः ।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥९०॥

त्यांच्या राज्यात प्रजा अतिशय आनंदी, सुखी, संतुष्ट, पुष्ट, अतिशय धार्मिक, निरोगी, दुष्काळादिकांच्या भयापासून मुक्त राहील. (९०)

न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥९१॥

कोणालाही पुत्रनिधनाचे दुःख किंवा स्त्रियांना पतिनिधनाचे दुःख अनुभवावे लागणार नाही. सर्व स्त्रिया पातिव्रत्याने वागतील. (९१)

न चाग्निजं भयं किञ्चिन्नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किञ्चिन्नापि ज्वरकृतं तथा ॥९२॥

प्रजेला अग्नी, पाणी, वारा, ताप, भूक, चोर इत्यादींपासून भय असणार नाही. नगरे, राज्ये, धनधान्यसमृद्ध होतील. (९२)

न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।
नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥९३॥
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥९४॥
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ।
असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥९५॥
राजवंशान् शतगुणान्स्थापयिष्यति राघवः ।
चातुर्वर्ण्यं लोकेऽस्मिन्स्वे स्वे धर्मे नियोक्ष्यति ॥९६॥

कृतयुगांतल्याप्रमाणे सर्व लोक नेहमी आनंदी असतील. कीर्तिमान श्रीराम पुष्कळ सुवर्णदक्षिणेने युक्त शेकडो अश्वमेध यज्ञ करतील. विद्वानांना दहा हजार कोटी गाई व ब्राह्मणांना विपुल धन देतील. शेकडो राजवंशांची

स्थापना करतील. आणि चारही वर्णांच्या लोकांना त्यांच्या त्यांच्या धर्मांत स्थापन करतील. (९३-९६)

दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥९७॥

अशा रीतीने अकरा हजार वर्षे राज्य करून श्रीराम ब्रह्मलोकाला जातील. (९७)

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥९८॥

वेदांसारखे पवित्र, पापनाशक, पुण्यमय असे रामचरित्र जो वाचील, तो सर्व पापांपासून मुक्त होईल. (९८)

एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥९९॥

ही रामायणकथा वाचणारा मनुष्य पुत्रपौत्र व परिवारासह मृत्यूनंतर स्वर्गाला जातो. (९९)

पठन् द्विजो वागृषभत्वमीयात्
स्यात्क्षत्रियो भूमिपतित्वमीयात्।
वणिग्जनः पण्यफलत्वमीया-
ज्जनश्च शूद्रोऽपि महत्त्वमीयात् ॥१००॥

ही कथा ब्राह्मणाने वाचली, तर तो विद्वान होईल. क्षत्रियाने वाचली तर त्याला राज्य मिळेल. वैश्याने वाचली तर त्याला व्यापारात नफा होईल आणि शूद्राने वाचली तर मोठेपणा मिळेल. (१००)

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये
आदिकाव्ये प्रथमः सर्गः समाप्तः॥

मूलरामायण समाप्त.

प्रार्थना

स्वस्ति प्रजाभ्यः परिपालयन्तां
न्याय्येन मार्गेण महीं महीशाः।
गोब्राह्मणेभ्यः शुभमस्तु नित्यं
लोकाः समस्ताः सुखिनो भवन्तु ॥१॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः॥२॥

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥३॥

मङ्गलं कोसलेन्द्राय महनीयगुणात्मने।
चक्रवर्तितनूजाय सार्वभौमाय मंगलम् ॥४॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतिस्वभावात्।
करोमि यद् यत् सकलं परस्मै
नारायणायेति समर्पयामि ॥५॥

॥ श्रीगणेशाय नमः ॥

श्रीरामरक्षास्तोत्रम्

ॐअस्य श्रीरामरक्षास्तोत्रमन्त्रस्य बुधकौशिक ऋषिः । श्रीसीतारामचन्द्रो देवता । अनुष्टुप् छन्दः । सीता शक्तिः । श्रीमान् हनुमान् कीलकं । श्रीरामचन्द्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः । अथ ध्यानम्-

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥१॥

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥२॥

सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥३॥

रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु भालं दशरथात्मजः ॥४॥

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः॥५॥

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः॥६॥

करौ सीतापतिः पातु हृदयं जामदग्न्यजित्।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः॥७॥

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत्॥८॥

जानुनी सेतुकृत्पातु जङ्घे दशमुखान्तकः।
पादौ बिभीषणश्रीदः पातु रामोऽखिलं वपुः॥९॥

एतां रामबलोपेतां रक्षां यः सुकृती पठेत्।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत्॥१०॥

पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः॥११॥

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन्।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति॥१२॥

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम्।
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥१३॥

वज्रपञ्जरनामेदं यो रामकवचं स्मरेत्।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥१४॥

आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः।
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥१५॥

आरामः कल्पवृक्षाणां विरामः सकलापदाम्।
अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥१६॥

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥१७॥

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥१८॥

शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम्।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥१९॥

आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषङ्गसङ्गिनौ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥२०

सन्नद्धः कवची खड्गी चापबाणधरो युवा।
गच्छन्मनोरथोऽस्माकं रामः पातु सलक्ष्मणः॥२१॥

रामो दाशरथिः शूरो लक्ष्मणानुचरो बली।
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः॥२२॥

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः॥२३॥

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयान्वितः।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः॥२४॥

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम्।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः॥२५॥

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम्॥२६

रामाय रामभद्राय रामचन्द्राय वेधसे।
रघुनाथाय नाथाय सीतायाः पतये नमः॥२७॥

श्रीराम राम रघुनन्दन राम राम
श्रीराम राम भरताग्रज राम राम।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम॥२८॥

श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रचरणौ वचसा गृणामि।
श्रीरामचन्द्रचरणौ शिरसा नमामि
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये॥२९॥

माता रामो मत्पिता रामचन्द्रः
स्वामी रामो मत्सखा रामचन्द्रः
सर्वस्वं मे रामचन्द्रो दयालु-
र्नान्यं जाने नैव जाने न जाने॥३०॥

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्॥३१॥

लोकाभिरामं रणरङ्गधीरं
राजीवनेत्रं रघुवंशनाथम्।
कारुण्यरूपं करुणाकरं तं
श्रीरामचन्द्रं शरणं प्रपद्ये॥३२॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥३३॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम्।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्॥३४॥

आपदामपहर्तारं दातारं सर्वसम्पदाम्।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्॥३५॥

भर्जनं भवबीजानामर्जनं सुखसम्पदाम्।
तर्जनं यमदूतानां रामरामेति गर्जनम्॥३६॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥३७॥

राम रामेति रामेति रमे रामे मनोरमे।
सहस्रनामतत्तुल्यं रामनाम वरानने॥३८॥

इति श्रीबुधकौशिकमुनिविरचितं श्रीरामरक्षास्तोत्रं सम्पूर्णम्।

आदित्यहृदयस्तोत्रम्

ॐ अस्य आदित्यहृदयस्तोत्रस्यागस्त्यऋषिरनुष्टुप् छन्दः, आदित्यहृदयभूतो भगवान् ब्रह्मा देवता। निरस्ताशेषविघ्नतया ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोगः।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥१॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।
उपगम्याब्रवीद् राममगस्त्यो भगवांस्तदा॥२॥

राम राम महाबाहो शृणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसे॥३॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपं नित्यमक्षयं परमं शिवम्॥४॥

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम्॥५॥

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वनम्॥६॥

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।
एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः॥७॥

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः॥८॥

पितरो वसवः साध्या अश्विनौ मरुतो मनुः।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः॥९॥

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥१०॥

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान्॥११॥

हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः॥१२॥

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगमः॥१३॥

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥१४॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते॥१५॥

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः॥१६॥

जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥१७॥

नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते॥१८॥

ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥१९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥२०॥

तप्तचामीकराभाय हरये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे॥२१॥

नाशयत्येष वै भूतं तमेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥२२॥

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥२३॥

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः॥२४॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव॥२५॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यति॥२६॥

अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥२८॥

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥२९॥

रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत्।
सर्वयत्नेत महता वृतस्तस्य वधेऽभवत्॥३०॥

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः।
निशिचरपतिसंक्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति॥३१॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
युद्धकाण्डे पञ्चाधिकशततमः सर्गः॥१०५॥

भगवंताची प्रार्थना

श्री अनंता मधुसूदना। पद्मनाभा नारायणा।
जगव्यापका जनार्दना । आनंदघना अविनाशा ॥१॥

सकळदेवाधिदेवा। कृपाळुवा जी केशवा ।
महानंदा महानुभावा । सदाशिवा सहस्ररूपा ॥२॥

चक्रधरा विश्वंभरा । गरुडध्वजा करुणाकरा ।
सहस्रपादा सहस्रकरा। क्षीरसागरा शेषशयना ॥३॥

कमलनयना कमलापती। कामिनिमोहना मदनमूर्ती ।
भवतारका धरित्या क्षिती। वामनमूर्ती त्रिविक्रमा ॥४॥

अगा ये सगुणा निर्गुणा। जगज्जनित्या जगज्जीवना ।
वसुदेवदेवकीनंदना । बाळरांगणा बाळकृष्णा ॥५॥

तुका आला लोटांगणी। मज ठाव द्यावा जी चरणी।
हेचि करीतसे विनवणी। भवबंधनीं सोडवावे ॥६॥

॥ श्रीराम समर्थ ॥

श्री समर्थ-रामदासस्वामि-विरचित

श्रीरामप्रार्थना

अनुदिन अनुतापें तापलों रामराया ।
परमदिनदयाळा नीरसीं मोहमाया।
अचपळ मन माझें नावरे आवरीतां।
तुजविण शिण होतो, धाव रे धाव आतां ॥१॥

भजनरहित रामा सर्वही जन्म गेला।
स्वजनजनधनाचा व्यर्थ म्यां स्वार्थ केला।
रघुपति मति माझी आपुलीशी करावी।
सकळ त्यजुनि भावें कास तूझी धरावी॥२॥

विषयजनितसूखें सौख्य होणार नाहीं।
तुजविण रघुनाथा वोखटें सर्व कांहीं।
रविकुळटिळका रे हीत माझें करावें।
दुरित दुरि हरावें, स्वस्वरूपीं भरावें॥३॥

तनु मन धन माझें राघवा रूप तुझें।
तुजविण मज वाटे सर्व संसार वोझें।
प्रचलित न करावी सर्वथा बुद्धि माझी।
अचळभजनलीळा लागली आस तूझी।।४।।

चपळपण मनाचें मोडितां मोडवेना।
सकळस्वजनमाया तोडितां तोडवेना।
घडि घडि विघडे हा निश्चयो अंतरींचा।
म्हणउनि करुणा हे बोलतों दीनवाचा।।५।।

जळत हृदय माझें जन्म कोट्यानुकोटी।
मजवरि करुणेचा राघवा पूर लोटीं।
तळमळ निववीं रे राम कारुण्यसिंधू।
षडरिपुकुळ माझें तोडिं याचा समंधू।।६।।

तुजविण करुणा हे कोण जाणेल माझी।
सिणत सिणत पोटीं पाहिली वाट तूझी।
झडकरिं झड घालीं, धाव पंचानना रे।
तुजविण मज नेते जंबुकी वासना रे।।७।।

सबळ जनक माझा राम लावण्यपेटी।
म्हणउनि मज पोटीं लागली आस मोठी।
दिवस गणित बोटीं प्राण ठेवूनि कंठीं।
अवचट मज भेटी होत घालीन मीठी॥८॥

जननिजनकमाया लेकरूं काय जाणे।
पय न लगत मूखें हाणितां वत्स नेणे।
जलधरकण-आशा लागली चातकासी।
हिमकर अवलोकी पक्षिया भूमिवासी॥९॥

तुजविण मज तैसें जाहलें रामराया।
विलग विषमकाळीं तूटली सर्व माया।
सकळजनसखा तूं, स्वामि आणीक नाहीं।
वमक वमन जैसें त्यागिलें सर्व कांहीं॥१०॥

स्वजनजनधनाचा कोण संतोष आहे।
रघुपतिविण आतां चित्त कोठें न राहे।
जिवलग जिव घेती, प्रेत सांडोनि जाती।
विषय सकळ नेती, मागुता जन्म देती॥११॥

सकळ जन भवाचे आखिले वैभवाचे।
जिवलग मग कैंचे, चालते हेंचि साचें।
विलग विषमकाळीं सांडिती सर्व माळीं।
रघुविर सुखदाता सोडवी अंतकाळीं॥१२॥

सुख सुख म्हणतां हें दुःख ठाकूनि आलें।
भजन सकळ गेलें, चित्त दुश्चित्त झालें।
भ्रमित मन कळेना, हीत तें आकळेना।
परम कठिण देहीं देहबुद्धी गळेना॥१३॥

उपरति मज रामीं जाहली पूर्णकामीं।
सकळभ्रमविरामीं रामविश्रामधामीं।
घडि घडि मन आतां रामरूपीं भरावें।
रविकुळटिळका रे आपुलेसें करावें॥१४॥

जळचर जळवासी नेणती त्या जळासी।
निशिदिनिं तुजपाशीं चूकलों गूणराशी।
भुमिधरनिगमांसी वर्णवेना जयासी।
सकलभुवनवासी भेटि दे रामदासीं॥१५॥

* * *

नसे भक्ति ना ज्ञान ना ध्यान कांहीं।
नसे प्रेम हें राम विश्राम नाहीं।
असा दीन अज्ञान मी दास तूझा।
समर्था जनीं घेतला भार माझा॥१॥

रघूनायका जन्मजन्मांतरींचा ।
अहंभाव छेदूनि टाकी दिनाचा।
जनीं बोलती दास या राघवाचा।
परी अंतरीं लेश नाहीं तयाचा॥२॥

दिनाचें उणें दीसतां लाज कोणा।
जनीं दास दीसे तुझा दैन्यवाणा।
शिरीं स्वामि तूं राम पूर्णप्रतापी।
तुझा दास पाहीं सदा शीघ्रकोपी॥३॥

रघूनायका दीन हातीं धरावें।
अहंभाव छेदूनियां उद्धरावें।
अगूणी तयालागिं गूणी करावें।
समर्थें भवसागरीं ऊतरावें॥४॥

किती भार घालूं रघूनायकाला।
मजकारणें शीण होईल त्याला।
दिनानाथ हा संकटीं धाव घाली।
तयाचेनि हे सर्व काया निवाली।।५।।

मज कोंवसा राम कैवल्यदाता।
तयाचेनि हे फीटली सर्व चिंता।
समर्था तया काय उत्तीर्ण व्हावें।
सदा सर्वदा नाम वाचे वदावें।।६।।

उदासीन हे वृत्ति जीवीं धरावी।
अतीआदरें सर्व सेवा करावी।
सदा प्रीति लागो तुझे गूण गातां।
रघूनायका मागणें हेंचि आतां।।७।।

तुझें रूपडें लोचनीं म्यां पाहावें ।
तूझे गूण गातां मनासी रहावें।
उठो आवडी भक्तिपंथेंचि जातां।
रघूनायका मागणें हेंचि आतां।।८।।

मनीं वासना भक्ति तूझी करावी।
कृपाळूपणें राघवें पूरवावी।
वसावें मज अंतरीं नाम घेतां ।
रघूनायका मागणें हेंचि आतां ॥९॥

सदा सर्वदा योग तूझा घडावा ।
तुझे कारणीं देह माझा पडावा।
उपेक्षूं नको गूणवंता अनंता।
रघूनायका मागणें हेंचि आतां ॥१०॥

नको द्रव्यदारा, नको येरझारा।
नको मानसीं ज्ञानगर्वें फुगारा।
सगूणीं मज लाविं रे भक्तिपंथा।
रघूनायका मागणें हेंचि आतां ॥११॥

भयें व्यापलों, प्रीतिछाया करावी।
कृपासागरें सर्व चिंता हरावी।
मज संकटीं सोडवावें समर्था।
रघूनायका मागणें हेंचि आतां ॥१२॥

मनीं कामना कल्पना ते नसावी।
कुबुद्धी कुडी वासना नीरसावी।
नको संशयो, तोडिं संसारव्यथा।
रघूनायका मागणें हेंचि आतां ॥१३॥

समर्थापुढें काय मागों कळेना।
दुराशा मनीं बैसली हे ढळेना।
पुरे संशयो, नीरसीं सर्व चिंता।
रघूनायका मागणें हेंचि आतां ॥१४॥

ब्रिदाकारणें दीन हातीं धरावें।
म्हणे दास भक्तांसि रे उद्धरावें।
सुटे ब्रीद आम्हांसि सांडूनि जातां।
रघूनायका मागणें हेंचि आतां ॥१५॥

* * *

तुझिया वियोगें जीवित्व आलें ।
शरीरपांगें बहु दुःख जालें।
अज्ञान दारिद्र्य माझें सरेना।
तुजवीण रामा मज कंठवेना ॥१॥

जडली उपाधी, अभिमान साधी।
विवेक नाहीं, बहुसाल बाधी।
स्वामीवियोगें पळही गमेना।
तुजवीण रामा मज कंठवेना ॥२॥

विश्रांति देहीं अणुमात्र नाहीं।
कुळाभिमानें पडिलों प्रवाहीं।
स्वहीत माझें होतां दिसेना।
तुजवीण रामा मज कंठवेना ॥३॥

विषयी जनानें मज लाजवीलें।
प्रपंचसंगें आयुष्य नेलें।
समयीं बहु क्रोध, शांती घडेना।
तुजवीण रामा मज कंठवेना ॥४॥

संसार संगे बहु पीडलों रे।
कारुण्यसिंधू मज सोडवीं रे।
कृपाकटाक्षें सांभाळिं दीना।
तुजवीण रामा मज कंठवेना ॥५॥

* * *

असंख्यात ते भक्त होऊनि गेले।
तिंहीं साधनांचे बहू कष्ट केले॥
नव्हे कार्यकर्ता भुमीभार जालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥१॥

बहू दास ते तापसी तीर्थवासी।
गिरीकंदरीं भेटि नाहीं जनांसी॥
स्थिती ऐकतां थोर विस्मीत झालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥२॥

सदा प्रेमराशी तयां भेटलासी।
तुझ्या दर्शनें स्पर्शनें सौख्यराशी॥
अहंता मनीं शब्दज्ञानें बुडालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥३॥

तुझ्या प्रीतिचे दास जन्मास आले।
असंख्यात ते कीर्ति बोलोनि गेले॥
बहू धारणा थोर चक्कीत जालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥४॥

बहूसाल देवालयें हाटकाचीं।
रसाळा कळा लाघवें नाटकाचीं॥
पुजा देखितां जाड जीवीं गळालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥५॥

कितेकीं देह त्यागिले तूजलागीं।
पुढें जाहले संगतीचे विभागी॥
देहेदुःख होतांचि वेगीं पळालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥६॥

किती योगमूर्ती किती पुण्यमूर्ती।
किती धर्मसंस्थापना अन्नशांती॥
पस्तावलों कावलों तप्त जालों।
तुझा दास मी व्यर्थ जन्मासि आलों॥७॥

सदा सर्वदा राम सोडूनि कामीं।
समर्था तुझे दास आम्ही निकामी॥
बहू स्वार्थबुद्धीनें रे कष्टवीलों।
तुझा दास मी व्यर्थ जन्मासि आलों॥८॥

* * *

श्रीमारुतिस्तोत्र

भीमरूपी महारुद्रा, वज्रहनुमान मारुती।
वनारी अंजनीसूता, रामदूता प्रभंजना ॥१॥

महाबळी प्राणदाता, सकळां ऊठवी बळें।
सौख्यकारी दु:खहारी, दूत वैष्णवगायका ॥२॥

दीननाथा हरीरूपा, सुंदरा जगदंतरा।
पातालदेवताहंता, भव्यसिंदूरलेपना ॥३॥

लोकनाथा जगन्नाथा, प्राणनाथा पुरातना।
पुण्यवंता पुण्यशीला, पावना परितोषका ॥४॥

ध्वजांगें उचली बाहो, आवेशें लोटला पुढें।
काळाग्नि काळरुद्राग्नि, देखतां कांपती भयें ॥५॥

ब्रह्मांडें माइलीं नेणों, आंवळे दंतपंगती।
नेत्राग्नि चालिल्या ज्वाळा, भ्रुकुटी ताठिल्या बळें ॥६॥

पुच्छ तें मुरडिलें माथां, किरीटी कुंडलें बरीं।
सुवर्णकटिकांसोटी, घंटा किंकिणि नागरा ॥७॥

ठकारे पर्वताऐसा, नेटका सडपातळू।
चपळांग पाहतां मोठें, महाविद्युल्लतेपरी ॥८॥

कोटीच्या कोटि उड्डाणें, झेंपावे उत्तरेकडे।
मंद्राद्रीसारिखा द्रोणू, क्रोधें उत्पाटिला बळें ॥९॥

आणिला मागुती नेला, आला गेला मनोगती।
मनासी टाकिलें मागें, गतीसी तुळणा नसे ॥१०॥

अणूपासोनि ब्रह्मांडायेवढा होत जातसे।
तयासी तुळणा कोठें, मेरुमांदार धाकुटे ॥११॥

ब्रह्मांडाभोंवते वेढे, वज्रपुच्छे करू शके।
तयासी तुळणा कैंची, ब्रह्मांडीं पाहतां नसे ॥१२॥

आरक्त देखिलें डोळां, ग्रासिलें सूर्यमंडळा।
वाढतां वाढतां वाढे, भेदिलें शून्यमंडळा ॥१३॥

धनधान्यपशूवृद्धि, पुत्रपौत्र समग्रही।
पावती रूपविद्यादि, स्तोत्रपाठें करूनियां ॥१४॥

भूतप्रेतसमंधाधि, रोगव्याधि समस्तही।
नासती तूटती चिंता, आनंदें भीमदर्शनें॥१५॥

हे धरा पंधरा श्लोकी, लाभली शोभली बरी।
दृढदेहो निसंदेहो, संख्या चंद्रकळागुणें॥१६॥

रामदासीं अग्रगणू, कपिकुळासि मंडणू।
रामरूपी अंतरात्मा, दर्शनें दोष नासती॥१७॥

॥ इति श्रीरामदासकृतं संकटनिरसनं
श्रीमारुतिस्तोत्रं संपूर्णम्॥

* * *

एकश्लोकी रामायण

आदौ रामतपोवनाभिगमनं, हत्वा मृगं काञ्चनं।
वैदेहीहरणं जटायुमरणं, सुग्रीवसंभाषणम्।
वालीनिर्दलनं समुद्रतरणं, लंकापुरीदाहनं।
पश्चाद्रावणकुम्भकर्णहननम्, एतद्धि रामायणम्॥

* * *

"हाचि सुबोध गुरूंचा"

नाम सदा बोलावें, गावें भावें, जनांसि सांगावें।
हाचि सुबोध गुरूंचा, नामापरतें न सत्य मानावें॥१॥

नामांत रंगुनीया व्यवहारीं सर्व भोग सेवावे।
हचि सुबोध गुरूंचा, भोगासंगें कुठें न गुंतावें॥२॥

आनंदांत असावें, आळस भय द्वेष दूर त्यागावे।
हाचि सुबोध गुरूंचा, अनुसंधाना कधीं न चुकवावें॥३॥

गोड सदा बोलावें, नम्रपणें सर्वलोकप्रिय व्हावें।
हाचि सुबोध गुरूंचा, भक्तीनें रघुपतीस आळवावें॥४॥

स्वान्तर शुद्ध असावें, कपटाचरणा स्वयें न वश व्हावें।
हाचि सुबोध गुरूंचा, मन कोणाचें कधीं न दुखवावें॥५॥

माझा राम सखा, मी रामाचा दास, नित्य बोलावें।
हाचि सुबोध गुरूंचा, रामापाशीं अनन्य वागावें॥६॥

यत्न करून करिन मी, यश दे, रामा, न दे, तुझी सत्ता।
हाचि सुबोध गुरूंचा, मानावा राम सर्वदा कर्ता॥७॥
आचार संयमानें युक्त असा नीतिधर्म पाळावा।
हाचि सुबोध गुरूंचा, खेळाऐसा प्रपंच मानावा॥८॥
दाता राम सुखाचा, संसारा मान तूं प्रभूसेवा।
हाचि सुबोध गुरूंचा, संतोषा सर्वदा मनीं ठेवा॥९॥
स्वार्थ खरा साधा रे, नित्य तुम्ही नामगायनीं जागा।
हाचि सुबोध गुरूंचा, मीपण जाळोनिया जगीं वागा॥१०॥
अभिमान शत्रु मोठा, सर्वांना जाचतो सुखाशेनें।
हाचि सुबोध गुरूंचा, मारावा तो समूळ नामानें॥११॥
राज्याधिकार येवो, किंवा जावो समस्त धन मान।
हाचि सुबोध गुरूंचा, भंगावें ना कदा समाधान॥१२॥
प्रेमांत राम रमतो, प्रेमाला मोल ना जगामाजीं।
हाचि सुबोध गुरूंचा, गुरुरायाला तहान प्रेमाची॥१३॥

* * *